* ओं *

* कापी * मेघदूत रघुवंश महाकाव्यस्य *

* [redacted]राम शर्म्मा दन्कौर निवासी *

* जिला बुलंदशहर · यू · पी · *

* चण्डी पाठशाला हापुड़ *

 (२)

कश्चिद निर्दिष्टनामा यक्षो योनिविशेषो रामस्य गिरिस्तस्या ऽऽश्रमस्तेषु चित्रकूटस्थानेषु वसतिं
स्थानं चक्रे कृतवान् । कथंभूतोयं यक्षस्स्वस्याधिकारस्तस्माद् निजानियोगाद् प्रमत्तोऽनवहितः पुनः
कथंभूतो यक्षो भर्तुः स्वामिनः शापेनाऽऽक्रोशेनाऽस्तङ्गमितो महिमा यस्य सो भ्रष्टसामर्थ्यः कथं
भूतेन शापेन कान्ताया विरहस्तेन गुरुस्तेन भार्यावियोगदुर्भरेण पुनः कथंभूतेन शापेन वर्षस्भोग्य
स्तेन संवत्सरनिर्वाह्येण कथंभूतेषु रामगिर्याश्रमेषु जनकस्य तनया तस्याः स्नानैः तैः पुण्यान्यु
दकानि येषु तेषु सीताऽवगाहनपूतजलेषु पुनः कथंभूतेषु रामगिर्याश्रमेषु छाया प्रधाना
श्च ते तरव इति छायातरवः स्निग्धा छाया तरवो येषु तेषु सान्द्रनमेरुवृक्षेषु ॥ १ ॥
कामी कामुकः स यक्ष आसाढस्य शुचिमासस्य प्रथमदिवसे प्रतिपदि मेघं घनं ददर्श दृष्टवान्
किं कृत्वा तस्मिन्नद्रौ चित्रकूटपर्वते कतिचिद् मासान् अष्टौ मासान्नीत्वाऽपनीय कथंभूतोसौ
ऽबलया विप्रयुक्त इति-अबलाविप्रयुक्तः कान्ताविरही पुनः कथंभूतः स कनकस्य वलयस्त
स्य भ्रंशस्तेन रिक्तः प्रकोष्टो यस्य स स्वर्ण ~~कङ्कण~~ (कटक) पातशून्यमणिबन्धः कथंभूतं मेघं माश्लि
ष्टः सानुर्येन स तमाक्रान्तकूटम्पुनः कथंभूतं मेघं वप्रक्रीडासु परिणत आऽसौ गजः स इव
प्रेक्षणीयस्तम् ~~[illegible]~~ (तिर्यग्दन्तप्रहारा) सक्तकरि दर्शनीयम् ॥ २ ॥

॥ पूर्वमेघदूतकाव्यम् ॥

(2)

राज्ञां राजेति राजराजस्तस्य राजराजस्य कुबेरस्याऽनुचरो यक्षश्चिरं बहुकालं दध्यौ चिन्तयामास किं कृत्वा
तस्य मेघस्य पुरोऽग्रे कथमपि गरीयसा प्रयत्नेन स्थित्वा स्थितिं कृत्वा कथंभूतस्य तस्य कौतुकस्याऽऽ
धानन्तस्य हेतुस्तस्याऽभिलाषो ~~[illegible]~~ तुत्पादन कारणस्य कथंभूतोऽनुचरोऽन्तर्गतानि बाष्पाणि यस्य सोऽन्तर्बाष्प
तास्रु: तथाहि सुखमस्याऽस्तीति सुखी तस्य सुखिनः स्त्रीजन संगतस्यापि पुरुषस्येति शेषः चेतोऽन्तःकरणमन्य
था वृत्ति यस्य तद्विकृतिमद्भवति जायते कस्मिन्सति मेघस्यालोकस्तस्मिन् घन दर्शने सति जने मनुष्ये
दूरे संस्था यस्य तस्मिन् विप्रकृष्ट देशस्ये सति पुनर्भूयः किं विकृतिमद्भवत्येव कथंभूते जने कण्ठ
स्याऽऽश्लेषः तस्य प्रणयोऽस्याऽ[illegible]स्तीति प्रणयी तस्मिन् कण्ठालिङ्गनार्थिनि ॥ ३ ॥
स यक्षः प्रीतः तुष्टः सन् तस्मै मेघाय प्रीत्या प्रमुखानि वचनानि यस्मिन् कर्मणि तत्प्रीति प्रमुखवचन
म्प्रेम पूर्वकं वाक्यं शोभनमागतं स्वागतं स्वागतवचनं व्याजहार पप्रच्छ कस्मिन्सति नभसि श्रावणे प्रत्या-
सन्ने समीपे सति किं करिष्यन् जीमूतेन मेघेन स्वस्य कुशलम्प्रचुरं यस्यां सा स्वकुशलमयी तान्ति
जक्षेम प्रधानां प्रवृत्तिं वार्तां हारयिष्यन् प्रापयिष्यन् कथंभूतः स दयितायाः जीवितन्तस्याऽऽ
लम्बनन्तस्याऽर्थीति दयिता जीवितालम्बनार्थी भार्या प्राणरक्षणाऽभिलाषी कथंभूताय
तस्मै कुटजानाङ्कुसुमानि तैः गिरि मल्लिका प्रसूनैः कल्पितोऽर्घो यस्मै तस्मै निर्मितपूजा
विधये कथंभूतैः कुटजकुसुमैः प्रत्यग्रैः नूतनैः ॥ ४ ॥

गुह्यको यक्षस्तम्मेघं यथा येयाचितवान् । कदुर्वनुत्सकस्य भावः औत्सुक्यन्तस्मादौत्कण्ठयादित्यि
तदपारमण यन्नोविचार्यान्न तीति किं मेघा घनः क कुत्र मन्देशाया वार्ताः क कुत्र कथं भूता
मेघो धूमश्च ज्योतिश्च सलिलञ्च मरुच्च यते षामितरेतरयोगे धूमज्योति सलिलमरुतास्तेषां
धूमाग्नि जलवायूना संनिपातः संघातः कथं भूताः मन्देशायाः प्राणाः सन्ति येषान्ते प्राणिनस्तैः
प्राणिभिः चेतनैः प्रापणीयाः प्रापयितव्याः कथं भूतैः प्राणिभिः पटूनि करणानि येषान्ते तैः
समर्थेन्द्रियैः तथाह कामेनार्ताः कामार्ताः मदनातुराः पुरुषा चेतनाश्चाचेतनाश्च तेषु
चेतनाचेतनेषु जड़ाजड़ेषु प्रकृत्या कृपणाः प्रकृति कृपणाः स्वभाव दीना भवन्तीति शेषः ॥ ५ ॥
हे मेघ त्वाम्मेघं जानामि वेद्मि अहमिति शेषः कथं भूतं त्वां पुष्कराश्चावर्तकाश्च तेषां कू घां
चिन्मेघश्रेष्ठानां वंशे कुले जातमुत्पन्नङ्कथं भूते वंशे भुवनेषु विदितस्तास्मिल्लोके प्रसिद्धे
पुनः कथं भूतन्त्वाम्मघोन इन्द्रस्य प्रकृतिश्चासौ पुरुषस्तन्प्रधान पुरुषम् पुनः कथं भूतं
त्वां कामेन रूपं यस्य स तामिच्छाधीन विग्रहं स तेन हेतुनाहं यक्षस्त्वयि मेघे अर्थिनो
भावोऽर्थित्वं याचकत्वं गतः प्राप्तः कथं भूतोऽहं विधेर्वशास्तस्माद् दैवायत्वाद् दूरे
बन्धुर्यस्य स वियुक्तभार्याः तथाहि अधिका गुणा यस्य स तस्मिन् बहुगुणे पुंसि । विषये
याञ्चा याचनं मोघा बन्ध्या वरमिष्टप्रियम धमे निर्गुणे लब्धः कामो यया सा
सफलमनोरथापि न वरं नाप्रियम् ॥ ६ ॥

पयोददातीति पयोदस्तत्संबुद्धौ हे पयोद हे जलद संतप्तानां संज्वारितानां त्वमेव शरणं रक्षकोऽसि भवतीति
तत्तस्मात्कारणात् मे मम संदेशं वार्तां प्रियाया भार्याया हर नय कथंभूतस्य मे धनपतेः क्रोधस्तेनावि
श्लेषितस्तस्य कुवेरकोपवियोजितस्य ते त्वया यक्षाणामीश्वरास्तेषां गृहास्तेषां नामलकानामलकानाम्नी
वसतिः स्थानं गन्तव्या रजितव्या कथंभूताऽलका बहिर्भवम्बाह्यञ्च तदुद्यानं तत्र स्थितश्चासौ हर
स्तस्य शिरसि या चन्द्रिका तया धौतानि हर्म्याणि यस्यां सा बहिःकाशमाऽधिष्ठिताशिव मस्तक
कौमुदी श्वेत धनिकभवना ॥ ७ ॥

हे मेघ पथिकानां वनिता इति पथिकवनिताः प्रोषितभर्तृकास्त्वाम्मेघम्प्रेक्षिष्यन्ते द्रक्ष्यन्ति
कथंभूताः पथिक वनिता उद्गृहीता अलकानामन्ता याभिस्ता उद्गृहीतकेशाग्राः पुनः कथं
भूता पथिक वनिताः प्रत्ययात् प्रियागमन विश्वासादाश्वसत्या विश्वासिताः कथंभूतं
त्वां पवनस्य पदवीं तामाकाशमार्गमारूढं स्थितम् अहं च विरहेण विधुरां तां वियोगखिन्नां
जायां भार्याम् कः पुरुषः उपेक्षेत त्यजेत् कः सति त्वयि मेघे सन्नद्धे समीपे सति अन्यो
मद्व्यतिरिक्तोऽपि यो जनोऽहं यक्ष इव पराधीना वृत्तिर्यस्य स पराधीनवृत्तिः पर
यत्तजीवनको न स्यात् न भवेत् ॥ ८ ॥

पवनो वायुर्मन्दं मन्दमिति मन्दं यथा सदृशं त्वां मेघन्नुदति प्रेरयति कथंभूतः पवनोऽनुकूलो योग्य
श्च पुनरयमसौ चातकस्तोयगन्धुर्मधुरं श्राव्यं यथास्यात्तथा नदति व्याहरति कथंभूत श्चातकः
ते तव वामो वाममार्गस्थः पुनः कथंभूत श्चातकस्तगन्धस्सगर्वः। किञ्च वलाकाऽङ्गनानयन
योः सुभगस्त्वं नेत्रप्रियं भवन्तन्त्वां नूनमवश्यं खे आकाशे सेविष्यन्ते भक्ष्यन्ते कथं भूता
वलाका गर्भस्याऽऽधानन्तदेव क्षणस्तत्र परिचयस्तस्मात्कुक्षिस्थजन्तून्पादनोत्सवाऽभ्या
सादावद्धा माला याभिस्ता नद्धपङ्क्तयः ॥९॥
हे मेघ अविहतागतिर्यस्य सोऽविच्छिन्नगमनः सन् तां पूर्वोक्तां भ्रातृजायां ताम्भद्रां यामवश्य
न्नूनं द्रक्ष्यसि द्रष्टासि त्वमिति शेषः कथंभूताम्भ्रातृजायां दिवसानाङ्गणना तत्र तत्परा
तामवशिष्टवासरसंख्याऽऽसक्ताम्पुनः कथंभूताम्भ्रातृजायामेकः पतिर्यस्याः सा तां
पतिव्रताम्पुनः कथंभूताम्भ्रातृजायामव्यापन्नाममृतान्तयाहि आशैव वन्ध इति आशा
वन्धोऽति तृष्णापाशोऽङ्गनानां स्त्रीणां हृदयं। चित्तं प्रायशः प्रायेण रुणद्धि प्रतिबध्नाति
कथंभूतं हृदयं कुसुमैः सदृशमिति कुसुमसदृशम्पुष्पतुल्यम्पुनः कथंभूतं हृदयं
विप्रयोगे। वियोगे सद्यो झटिति पाति भ्रंशनशीलम्पुनः कथंभूतं हृदयं प्रणयात्प्रेम्णा
सीदति अस्तीति तत् प्रणाय प्रेमयुक्तम् ॥१०॥

॥ पूर्वमेघदूतकाव्यम् ॥

हे मेघ मराला राजहंसा नभसि आकाशे भवतो मेघस्या ऽऽ कैलासात्कैलास पर्यन्तं सहायाः
सहायकाः संपत्स्यन्ते भविष्यन्ति कथंभूता राजहंसा मानस उत्का इति मानसोत्का मानसे
सरोत्कण्ठिताः । किङ्कृत्वा ते तव तद्गर्जितं स्तनितं श्रुत्वाऽऽकर्ण्य कथंभूतङ्गर्जितं श्रवणयोः
सुभगमिति श्रवणसुभगं श्रोत्रप्रियन्तत्किं यन्महीम्पृथ्वीमवन्ध्यां सफलाङ्कर्तुं विधा
तुम्प्रभवति शक्नोति कथंभूता महीमुद्गताः । शिलीन्ध्रा यस्यां सा तामुद्भूतकन्दलका
म्पुनः कथंभूता राजहंसाः पथिषु साधुः पाथेयम्पाथेयं सन्ति येषां ते पाथेयवन्तो
बिसकिसलयानां छेदास्तैः पाथेयवन्तो मृणालाग्रसकलपाथेयभोजनवन्तः ॥ ११॥

हे मेघ त्वमिमं शैलं पर्वतमापृच्छस्व हे साधो ऽहं यामीत्यामन्त्रणेन सम्भाजय किङ्कृत्वाऽऽ
लिङ्ग्य । आलिङ्ग्य कथंभूतं शैलं प्रियश्चासौ सखेति प्रियसखस्तं स्निग्धमित्रम्पुनः
कथंभूतं शैलं तुङ्गमुन्नतम्पुनः कथंभूतं शैलं रघुपतेः पदानि रामचन्द्रचरणैर्मेखलासु
कटिष्वङ्कितं चिह्नितं कथंभूतैः रघुपतिपदैः पुंसां जनानां वन्द्यैः पूजनीयैः ~~पुनः कथंभूत~~
यस्य शैलस्य स्नेहस्य व्यक्तिरिति स्नेहव्यक्तिः प्रेमाविर्भावो भवति जायते पुनः । किङ्कृत्वा
काले कालेसमये समये भवतो मेघस्य संयोगं सम्पर्कमेत्य प्राप्य कथंभूतस्य यस्योष्णमु
ष्माणं वाष्पं नेत्रजलम्मुञ्चत त्यजतः कथंभूतं वाष्पं । चिरविरहाज्जातं चिरविरहजं
बहुकालवियोगजन्यम् ॥ १२॥

जलन्ददातीति जलदस्तत्सम्बुद्धौ हे जलद हे पयोद तावदिदानीं कथयतो वदतो मत्त इति शेषः तव प्रया- (८)
णस्यानुरूपस्तमबद्धमनाऽनुकूलम्मार्गम्पन्थानं शृणु आकर्णय तदनु मार्गश्रवणानन्तरम्
मम संदेशं वार्तां श्रोष्यसि आकर्णयिष्यसि कथंभूतं संदेशं श्रोत्राभ्यां पेयमिति श्रोत्रपेयं कर्ण-
पानार्हं किं कृत्वा यत्र मार्गे खिन्नः खिन्नः क्षीणबलः सन् शिखरिषु पर्वतेषु पदं चरणं न्यस्य
निक्षिप्य गन्तासि व्रजितासि पुनः किं कृत्वा क्षीणः क्षीणः कृशाङ्गः सन् स्रोतसां नदीनां परि-
लघु परिलघु अगुरु पयो जलमुपभुज्य पीत्वा ॥ १३ ॥
हे मेघ अस्मादमुष्मात् स्थानादाश्रमादुदीचि उदङ्मुखं यस्य स उदङ्मुख उत्तराभिमुखः सन् खमा-
काशमुत्पत व्रज त्वमिति शेषः कथंभूतात् स्थानात् सरसा निचुला यस्मिंस्तस्मात्सान्द्रस्थल-
वेतसात् किं कुर्वन् पथि मार्गे दिङ्नागास्तेषामाशागजानां स्थूला ये हस्ताः तेषामवले-
पास्तान् पथि वासुं गर्वान् परिहरन् परिक्षिपन् कथंभूतः त्वं मुग्धा असिताः सिद्धाङ्गनास्ताभिः
सुन्दरैर्वपोभिः विशेषाऽबलाभिः श्चकितचकित चकितप्रकारं यथा स्यात्तथा दृष्ट
उत्साहो यस्य स लक्षितोद्योगः कथं भूताभिः मुग्धसिद्धाङ्गनाभिरिति होतो उर्ध्वानि
मुखानि यासां ताभिः उद्ध्वानननीभिरितीति किंस्वित् पवनो वायुरद्रेः पर्वतस्य शृङ्गं शिखरं
हरति धुनोति किंस्वित्क्रमः ॥ १४ ॥

॥ पूर्वमेघदूतकाव्यम् ॥

हे मेघ! आखण्डलस्येन्द्रस्यैतद्धनुषः खण्डन्धनुः खण्डं चापशकलम्पुरस्तादग्रे वल्मीकस्याऽग्रस्तस्मा
द्वामलूरविवराद्भवति जायते कथंभूतन्धनुः खण्डम्प्रेक्षितुं योग्यम्प्रेक्ष्यन्दर्शनीयम् इव रत्नानां
छाया स्तासां व्यतिकरः पद्मरागादि मणि प्रभा मिश्रणमिव येन धनुः खण्डेन ते तव श्यामं मेचकं
वपुः शरीरमतितरामत्यन्ता क्रान्तिं शोभामापत्स्यते प्राप्स्यति केन कस्य कामिवस्फुरिता
रुचिर्यस्य तत्तेनोज्ज्वलकान्तिना बर्हेण मयूरपिच्छेन गोपस्य वेष इव वेषो यस्य स तस्य
गोपरूपधारस्य। विष्णोः श्रीकृष्णस्य वपुरिव ॥ १५ ॥

हे मेघ! किञ्चित्पश्चादनु लघ्वी गतिर्यस्य स क्षिप्रगमनः सन् भूयः पुनरुत्तरेणोत्तरमार्गेणैव व्रज गच्छ
त्वमिति शेषः। किङ्कृत्वा मालम्माला ऽख्यं क्षेत्रं शैलप्रायमुन्नतस्थलमारुह्य तत्रापि वृष्ट्या कथंभूतं
क्षेत्रं सद्यो स्फोटित सीरैरुत्कर्षणन्तेन सुरभि तद्भूला त्कर्षण घ्राणतर्पणं कथं भूतस्त्वामिति हेतो
जनपदानां वधवस्तासां लोचनानि तैः पल्लीयोषिन्नेत्रैः पीयमानः सादरं वीक्ष्यमाणः स इतीति
किङ्कृत्वा फलं सम्पन्नत्वयि मेघे आयत्तमधीनं कथं भूतैः जनपदवधूलोचनैर्भ्रूणां विलासास्तेषा
मनभिज्ञानि तैः भ्रुकुटि विकार चतुरैः पुनः कथं भूतैर्जनपदवधूलोचनैः प्रीत्या स्निग्धा
नि तैः प्रेमार्द्रैः ॥ १६ ॥

हे मेघ आम्राः कूटेषु यस्य स आम्रकूटः रसालशिखरः सानुरस्तीति सानुमान पर्वतस्त्वां मेघं (१०)
साधुः सम्यग् मूर्ध्ना मस्तकेन वक्ष्यति वोढा कथंभूतन्त्वां आसारेण प्रशमितो वनस्योपप्लवो-
येन स तम् धारावृष्टिनिवारितदावाग्निम्पुनः कथंभूतन्त्वां अध्वनः श्रमस्तेन परिगतस्ताम्
मार्गखेदव्याप्तन्तथाहि क्षुद्रोऽपि कृपणोऽपि विमुखः पराङ्मुखो न भवति नो जायते किमति
प्रथमकृतसुकृतं तस्याऽपेक्षा तया पूर्वोपकारपर्यालोचनया संश्रयाय संश्रयणाय मित्रे
सुहृदि प्राप्त आगते सति यः पर्वतस्तथा तेन प्रकारेणोच्चैरुन्नतः पुनर्भूयः किं विमुखो
भविष्यति। न भविष्यतीत्यर्थः ॥ १७ ॥

हे मेघ अचलः पर्वतोऽमराणां मिथुनानि तैः सम्प्रेक्षणीया तां खेचरदेवयुग्मदर्शनीयाम-
वस्थां दशां नूनमवश्यं यास्यति याता कस्मिन् सति स्निग्धाश्चासौ वेणी तया सवर्णस्तस्मिन्नम-
स्रकेशबन्धच्छवि त्वयि मेघे शिखरं शृङ्गमारूढे स्थिते सति कथंभूतोऽचलः परिण-
तानि च तानि फलानि तैः द्योतन्तीति परिणतफलद्योतिनस्तैः परिपक्वप्रसवकान्तिभिः
काननानामाम्रास्तैः (आरण्य) रसालैः छन्ना उपान्ता यस्य स आवृतपार्श्वः कस्याः क इव भुवः
पृथिव्या मध्येऽन्तर्भागे श्यामो मेचकः स्तनः कुच इव कथंभूतः स्तनः शेषश्चासौ विस्तार-
स्तत्र पाण्डुरविशिष्टप्रदेशहारिणः ॥ १८ ॥

॥ पूर्वमेघदूतकाव्यम् ॥

१९ हे मेघ तत्परमाम्रकूटादनन्तरं वर्त्म मार्गं तीर्णः प्रतिक्रान्तः सन् रेवां नर्मदां द्रक्ष्यसि अवलोकयिष्यसि त्वमिति शेषः । किं कृत्वा वने चरन्तीति वनचरास्तेषां वध्वः ताभिर्भुक्ताः कुञ्जा यस्मिंस्तस्मिन्नरण्ये वा सि स्त्री सेवित लतागृहे तस्मिन् वने मुहूर्तमल्पकालं स्थित्वा विश्रम्य कथंभूतस्त्वं तोयोत्सर्गस्तेन द्रुततरा गतिर्यस्य स जलत्यागात् क्षिप्रगमनः कथंभूतां रेवां उपलैर्विषमस्तस्मिन् पाषाणनिम्नोन्नते विन्ध्यस्य पादस्तस्मिन् प्रत्यन्तपर्वते विशीर्णां विसृमरां कस्य कामिव गजस्य कारणाऽङ्गशरीरे भूतिं शृङ्गारमिव कथंभूतां भूतिं भक्तानां छेदास्तै रचनाभङ्गिभिर्विरचितां निर्मिताम् ॥ १९ ॥

हे मेघ वान्ता रष्टिर्येन स उद्गीर्णवर्षः सन् गच्छेः व्रजेः । किं कृत्वा तस्या रेवाया स्तोयं जलमादाय गृहीत्वा कथंभूतं तोयं तिक्तैः सुगन्धिभिः वनानां गजास्तेषां मदास्तैः अरण्यकरिदानैः वासितं सुरभितं पुनः कथंभूतं तोयं जम्बूनां कुञ्जाः तैः प्रतिहतो रयो यस्य तद् बाधिता लतागृह प्रतिरुद्ध वेगं हे घन हे मेघ अन्तः सारो यस्य स तमन्तरजलं त्वां मेघ सोऽनिलो वायुस्तुलयितुं मापयितुं न शक्ष्यति शक्तो न भविष्यति यस्मात् तथाहि रिक्तोऽन्तः सारशून्यः सर्वोऽखिलो लघुः प्रकम्प्यो भवति जायते पूर्णता सारवत्ता गौरवाय अप्रकम्पयत्वाय भवति जायते ॥ २० ॥

॥ पूर्वमेघदूतकाव्यम् ॥

हे मेघ सारङ्गा भृङ्गाः कुरङ्गाः मतङ्गजाश्च जलस्य लवं मुञ्चति इति जललवमुक् तस्य जललवमुचः सलिलकणत्यजतः ते तव मार्गं पन्थानं सूचयिष्यन्ति बोधयिष्यन्ति भृङ्गाः किं कृत्वा सूचयिष्यन्ति नीपं स्थलकदम्ब पुष्पं दृष्ट्वा अवलोक्य किंभूतं केसरैः किञ्जल्कैः हरितश्च तत्कपिशश्चेति हरितकपिशं पालाश कृष्ण पीतं कथंभूतैः केसरैः अर्द्धरूढास्तैः एकादेशाद्धृतैः कुरङ्गाः किं कृत्वा सूचयिष्यन्ति कच्छेषु अनु इति अनुकच्छं जलप्रायदेशं कन्दलीभूमि कन्दलीः जग्ध्वा भक्षयित्वा आविर्भूताः प्रथमामुकुला यासां ताः प्रथमोत्पन्नकुड्मला मतङ्गजाः किं कृत्वा सूचयिष्यन्ति अरण्येषु वनेषु उर्व्याः पृथिव्याः गन्धं सुगन्धिमाघ्राय शिंघित्वा कथंभूतं गन्धमधिकः सुरभिमति घ्राणतर्पणम् ॥ २१ ॥

हे सखे हे मित्र ते तव पर्वते पर्वते प्रतिपर्वते कालस्य क्षेप स्तम् कालक्षेपं समयविलम्बमहं पश्यामि उत्प्रेक्षे अहमिति शेषः कथंभूतस्य ते मम प्रियायाः इदमिति मत्प्रियार्थं मदर्थार्थं द्रुतं क्षिप्रमपि यियासोः यातुमिच्छोः कथंभूते पर्वते ककुभैः सुरभिस्तस्मिन् कुटजकुसुमसुगन्धिनि भवान् मेघः कथं गरीयसा प्रयत्नेनापि आशु शीघ्रं गन्तुं यातुं व्यवस्येत् उद्युञ्जीत कथं भूतो भवान् शुक्लापाङ्गा येषां ते तैः मयूरैः प्रत्युद्यातः प्रत्युद्गतः किं कृत्वा केकाः स्ववाणीः स्वागती कृत्य स्वागतवचनीकृत्य कथंभूतैः शुक्लापाङ्गैः सजलानि नयनानि येषां तैः स सलिल नेत्रैः ॥ २२ ॥

(१२)

(२३) हे मेघ कतिपयानि च तानि दिनानि तेषु स्थायिनो हंसा येषु ते अल्पदिवसस्थायिनः वर्तमानमराला: दशार्णाः जनपदाः एवं विधाः सम्पत्स्यन्ते भविष्यन्ति कथंभूता दशार्णाः केतकैः केतकीकुसुमैः पाण्डुच्छाया यासां ता पाण्डुच्छायाः पाण्डुच्छाया उपवनानां वृतयो येषु ते हरितवर्णा तास कण्टक शाखा वर्णाः कथंभूतैः केतकैः सूचीभिन्नैः सूचिभिन्नास्तैः मुकुलाग्रविकासितैः पुनः कथंभूता दशार्णाः गृहस्य बलिं भुञ्जते इति गृहबलिभुजः तेषां काकादिनगरपक्षिणां नीडानामारम्भास्तैः कुलायनिर्माणैः आकुलानि ग्रामेषु चैत्यानि येषु ते आकीर्णनगरव्याप्ताः पुनः कथंभूता दशार्णाः परिणतानि च तानि फलानि तैः श्यामानि यानि जम्बूनां वनानि तैः रम्याः परिपक्वप्रसवकृष्णवर्णवर्तितारण्यरम्याः आगमिते त्वयि मेघे आसन्ने समीपे सति ॥ २३॥

हे मेघ कामुकस्य भावं कामुकत्वं तस्य विलासिताया: अविकलं समग्रं फलं लाभः लब्धा लप्स्यते त्वयीति शेषः किं कृत्वा तेषां दशार्णानां राज्ञां धानी तां राजधानीं प्रधाननगरीं विदिशाभिधां गत्वा प्राप्य कथंभूतां राजधानीं दिक्षु प्रथितां प्रायतां विदिशेति लक्षणं यस्याः सा तां प्रसिद्धं विदिशानामकां यस्मात् वेत्रवत्याः नद्याः पयः जलं तीरस्थायान्तरस्य त्वत्सानि तं तेन सुभगं तटोपान्तगर्जितसुन्दरं यथास्यात्तथा पास्यसि पातासि किमिव मुखं चलोर्मिवं कथंभूतं मुखं भ्रूभङ्गेन सह वर्तते इति सभ्रूभङ्गं भ्रकुटिविकारयुक्तं कथंभूतं पयः स्वादुमधुरं पुनः कथंभूतं पयश्चलिता उर्मयो यस्मिंस्तत चलोर्मि तरङ्गितम ॥ २४॥

हे मेघ तत्र विदिशासमीपे नीचैराख्यन्नीचैर्नामकं गिरिं पर्वतमधिवसेः अधिवस किमर्थं विश्रामस्य हेतुस्तस्य वि-
श्रामहेतोः मार्गखेदापनयनार्थं कथंभूतं गिरिं प्रौढानि पुष्पाणि येषान्तैः प्रबुद्धकुसुमैः कदम्बैः नीपवृक्षैः
तव सम्पर्कस्त्वत्सम्पर्कस्तस्मात्भवत्संसर्गात्पुलकितं सञ्जात पुलकितमिव स्थितमङ्ग् इव यः गिरिः नागरा-
णां पौराणामुद्दामानि उत्कटानि यौवनानि तारुण्यानि प्रथयति प्रकटयति कैः शिलानां वेश्मानि तैः
पाषाणगेहैः कथंभूतैः शिलावेश्मभिः पणितुं योग्याः पण्याः याः स्त्रियस्तासां रतिषु यः परिमलस्त-
मुद्गिरन्तीति तैः वेश्यासुरतगन्धविशेषाऽऽविष्कुर्वद्भिः ॥ २५ ॥

हे मेघ विश्रान्तः सन् विनीताध्वश्रमः सन् व्रज गच्छ किं कुर्वन्नुद्यानानां आरामाणां यूथिकानां जालका-
नि इति मागधी कुसुममुकुलानि नवाम्बु तज्जलस्य कणास्तैः नूतनसलिललवैः सिञ्चन् आर्द्राकुर्वन्
पुनः किं कुर्वन् पुष्पाणि लुनन्तीति पुष्पलाव्यस्तासां मुखानि तेषां कुसुमावचायी वक्त्राणां छायाया
दानं तस्मात् प्रतिबिम्बविश्राणात् क्षणं परिचित मुहूर्तमात्रसंश्लिष्टः सन् किंभूतानां पुष्प-
लाविमुखानां गण्याः स्वेदशस्तस्यापनयनं तेन या रुजा तया क्लान्तानि कर्णानामुत्पलानि
येषां तेषां कपोल घर्मोपमार्जन पीडाम्लान श्रोत्राऽभरणानाम् ॥ २६ ॥

॥ पूर्वमेघदूतकाव्यम् ॥

हे मेघ उत्तराशामुदीचीं दिशं प्रस्थितस्य गच्छतो भवतो मेघस्य पन्था मार्गः वक्रः कुटिलः यद्यपि तथापि उज्जयिन्या विशालनगरस्य सौधानाम् उत्सङ्गास्तेषु प्रणयस्तस्य विमुख इति हर्म्याणां परिभाग परिचय-पराङ्मुखः मास्मभूः माभूः तत्र उज्जयिन्यां पौराश्चता अङ्गनास्तासां नगरस्त्रीणां लोचनैः नेत्रैः यदि न रमसे न क्रीडसि तर्हि वञ्चितोऽसि प्रतारितोऽसि कथंभूतैः लोचनैः विद्युतो दामानि तेषां स्फुरितानि तैस्य श्चकितानितैः तडिल्लतास्फुरणचञ्चलैः पुनः कथंभूतैः लोचनैः लोलापाङ्गा येषां तैः चञ्चलकटाक्षैः ॥ २७॥

हे मेघ रसोऽभ्यन्तरे यस्य सः जलान्तरो भवस्याः किं कृत्वा निर्विन्ध्यायाः नद्याः पथि मार्गे संनिपत्य संगत्य कथंभूतायाः निर्विन्ध्यायाः वीचीभिः क्षोभस्तेन स्तानिता ये विहगास्तेषां श्रेणि एव काञ्ची गुणो यस्याः सा तस्याः ऊर्मिचञ्चल गर्जित हंसपङ्क्ति मेखलायाः पुनः कथंभूतायाः निर्विन्ध्यायाः स्खलितेन सुभगमभिति स्खलितसुभगमुपसर्पणं सुन्दरं यथा स्यात्तथा संसर्पन्त्याः प्रवहन्त्याः पुनः कथंभूतायाः निर्विन्ध्यायाः दर्शित आवर्त एव नाभिर्यया सा तस्याः प्रकटितात्मभ्रमतुन्दैः तथाहि स्त्रीणामङ्गनानां प्रियेषु वल्लभेषु विभ्रमो विलास एव आद्यम्प्रथमं प्रणयस्य वचनमिति । प्रार्थना वाक्यमस्ति ॥ २८॥

॥ पूर्वमेघदूतकाव्यम् ॥

हे मेघ असौ त्वया सिन्धुर्नदी येन यथा विधिना अनुष्ठानेन कार्श्यं कृशत्वं त्यजति जहाति स विधिः (२६)
त्वया मेघेनैव उपपाद्यः कर्त्तव्यः कथंभूता सिन्धुः प्रवेणी वेणीभूतम् प्रतनु सलिलं यस्याः सा
वेण्याकार स्तोक जला पुनः कथंभूता सिन्धुः जीर्णानि च तानि पर्णानि तैः पुराणपत्रैः पाण्डुः छाया
यस्याः सा पाण्डुवर्णा कथंभूतैः जीर्णपत्रैः रुहन्तीति रुहास्तटयो रुहा ये तरवस्तेभ्यो भ्रंशन्ते
इति तटरुह तरुभ्रंशिनस्तैः कूलसमुद्भव वृक्षपतितैः पुनः कथंभूता सिन्धुः हे सुभग हे
सुन्दर ते तव शोभाग्यं सुभगत्वं व्यञ्जयन्ती प्रकटयन्ती कया विरहस्यावस्था तया वियोग
दशया कथंभूतस्य ते प्रतीतस्य गतस्य ॥ २९ ॥

हे मेघ विशालां शोभानां पुरीं नगरीमनुसर व्रज किं कृत्वा अवन्तीन् जनपदान् प्राप्य गत्वा कथं
भूतान् अवन्तीन्-उदयनस्य कथास्तासां कोविदा ग्रामेषु ये वृद्धास्ते सन्ति तेषु तान् वत्सराज-
गाथा तत्त्वज्ञान् नगरस्थितविरान् कथंभूतां पुरीं पूर्वमुद्दिष्टातां प्रथमकथितां पुनः कथंभूतां
पुरीं श्रिया विशाला तां संपत्ति महतीं पुनः कथंभूतां पुरीं दिवः स्वर्गस्य एकमद्वितीयं
खण्डं शकलमिव स्थितामिति शेषः कथंभूतं खण्डं स्वर्गिणां स्वर्गवतां जनानां शेषैः भुक्ताव
शिष्टैः पुण्यैः सुकृतैः हृतमानीतं पुनः कथंभूतं खण्डं कान्तिमत् यस्य तदुज्ज्वलं कथं
भूतानां स्वर्गिणां गां भूमिं गतानां व्रजतानां क्व सति सुचरितस्य फलमिति सुचरितफलं तस्मिन्
पुण्यफले स्वल्पीभूते अल्पावशिष्टे सति ॥ ३० ॥

(२७) हे मेघ यत्र विशालायां प्रत्यूषेषु प्रहेमुखेषु शिप्रायावात इति शिप्रावातः शिप्रानदीपवनः स्त्रीणां अङ्गनानां सु-
तस्य ग्लानि स्तांसम्भोग खेदं हरति नुदति क इव प्रियतमः बल्लभ इव कथंभूतः प्रियतमः प्रार्थनायां
चाटु करोतीति प्रार्थनाचाटुकारः याञ्चाश्लाघाविधाता किं कुर्वन् सन् सारसानां हंसानां कूजितं रुतं
दीर्घी कुर्वन् विस्तारयन् कथंभूतं कूजितं पटु प्रस्फुटं पुनः कथंभूतं कूजितं मदेन कलमिति मद-
कलं मदकलदानाव्यक्त मधुरं कथंभूतः शिप्रावातः स्फुटानि च तानि कमलानि तेषामामोदस्तेन
या मैत्री तया कषायः विकासित पद्म परिमल संसर्ग सुरभिः पुनः कथंभूतः शिप्रावातः अङ्गस्या
नुकूलः गात्रसुखस्पर्शः ॥ ३१ ॥

हे मेघ अस्याः उज्जयिन्याः हर्म्येषु धनिक भवनेषु अध्वनः खेदमिति अध्वखेदं मार्गक्लेशम्
नयथाः अपनय त्वमिति शेषः किं कुर्वन् लक्ष्मीं शोभां पश्यन् अवलोकयन् कथंभूतेषु हर्म्येषु
कुसुमैः सुरभीणि तेषु प्रसून सुगन्धिषु पुनः कथंभूतेषु हर्म्येषु ललितायाः वनितास्तासां पादरागा-
स्तैरङ्कितानि तेषु सुन्दर स्त्री चरण लाक्षा रस चिह्नितेषु कथंभूतस्त्वं केशानां संस्कारस्तदर्थं स्तेषां धूपास्तैः
कचशोधन धूम्रैः उपचितं वपुर्यस्य सः परिपुष्ट शरीरः कथंभूतैः केश संस्कार धूपै र्जालेभ्य
उद्गीर्णास्तैः गवाक्ष मार्ग निर्गतैः पुनः कथंभूतस्त्वं बन्धुषु प्रीतिस्तस्मात्प्रीति स्नेहेन भवनानां
शिखिनस्तैः हर्म्य मयूरैः दत्तान्नृत्यमेवोपहारो यस्मै सः समर्पित नर्तनोपायनः ॥ ३२ ॥

हे मेघ चण्डया ईश्वरस्तस्य शिवस्य पुण्यं पवित्रं धाम स्थानं यायाः व्रजेः त्वमिति शेषः कथंभूतस्त्वं
भर्तुः स्वामिनः कण्ठच्छविरिव छविर्यस्यासौ ग्रीवाकान्तिः इति हेतोः गणैः प्रमथादिभिः सादरं सकौतकं
वीक्ष्यमाणः प्रेक्ष्यमाणः कथंभूतस्य चण्डीश्वरस्य त्रयाणां भुवनानां समाहारः त्रिभुवनं तस्य गुरुस्तस्य
त्रैलोक्यस्वामिनः कथंभूतं धाम गन्धवत्याः नद्याः मरुद्भिः पवनैः धूतमुद्यानं यस्य तत्काम्य (१८)
तारामं कथंभूतैः मरुद्भिः कुवलयानां रजांसि तेषां गन्धः सोऽस्ति येषु तैः उत्पन्नपरागगन्धवद्भिः
पुनः कथंभूतैः मरुद्भिः तोयक्रीडासु निरताः या युवतयस्तासां स्नानैः तैः तिक्ताः तैः जललीला-
सक्ताङ्गनास्नानीयसुरभिभिः ॥ ३३ ॥

धरतीति धरः जलस्य धरः जलधरः तत्संबुद्धौ हे जलधर यावत्कालपर्यन्तं भानुः सूर्यो नयन-
योः विषयस्तं नेत्रपथमत्येति अतिक्रामति तावत्ते त्वया स्थातव्यं स्थानीयं किं कृत्वा अन्य-
स्मिन्सन्ध्यातिरिक्तकालेऽपि काले समये महाकालं चण्डीश्वरस्थानमासाद्य प्राप्य
किमर्थं स्थातव्यमित्यत्राह तथाहि आमन्द्राणामीषद्गम्भीराणां गर्जितानां स्तनितानामविक-
लं समग्रं फलं लाभं लप्स्यसे प्राप्स्यसि त्वमिति शेषः किं कुर्वन् शूलिनः शिवस्य श्लाघ-
नीयां प्रशंस्यां संध्यायां बलिः तत्र पटहतां सायंकालिकपूजा ढक्कानादतां कुर्वन् विदधत्
॥ ३४ ॥

(२६)

॥ पूर्वमेघदूतकाव्यम् ॥

हे मेघ तत्र सन्ध्याकाले वेश्या गणिकाः त्वयि मेघे कटाक्षानपाङ्गानामोक्ष्यन्ति त्यक्ष्यन्ति किं कृत्वा त्वत्तो मेघात् वर्षस्याग्रबिन्दवस्तान् वृष्टि प्रथमकणान् प्राप्य लब्ध्वा कथंभूतान् वर्षाग्रबिन्दून् सुखयन्तीति सुखा नखानां पदानि तेषु सुखास्तान् नख क्षत सुखकरान् कथंभूता वेश्या पदानां न्यासास्तैः क्वणनिक्षेपैः क्वणितारशना यासां ताः शब्दितमेखलाः पुनः कथंभूता वेश्या चामरैर्वालव्यजनैः क्लान्ता हस्ता यासां ताः श्रान्तकराः कथंभूतैश्चामरैः लीलया ऽवधूतानि तैः क्रीडाकम्पितैः पुनः कथंभूतैः चामरैः रत्नानां छाया तया खचिता नलयो येषां तैर्मणिक्रान्तिरूषित चामरदण्डैः कथंभूतान्कटाक्षान् मधुकराणां श्रेणयस्तद्वद्दीर्घास्तान् भ्रमर पंक्ति महतः ॥ ३५ ॥

हे मेघ पश्चात्सन्ध्याबल्यन्तरं पशुपतेः शिवस्य नृत्यस्याऽऽरम्भस्तस्मिन्स्ताण्डव प्रारम्भे आर्द्रञ्च यन्नागाजिनं तत्रेच्छा तां सान्द्रगज चर्मवाञ्छां हर अपनय त्वमिति शेषः कथंभूतस्त्वं सन्ध्याया भवं सान्ध्यं सायंकालिकं तेजो ज्योतिः दधानः धारयन् पुनः कथंभूतस्त्वमुच्चैः उन्नतं भुजा एव तरवस्तेषां वनमिति बाहुवृक्षारण्यं मण्डलेन स्वकारेणाभिलीनो व्याप्तः कथंभूतं तेजः प्रतिनवञ्च तज्जपायाः पुष्पं तद्वद्रक्तमिति अभिनवजपाकुसुमारुणं पुनः कथंभूतस्त्वं शान्ता उद्वेगा यया स्तेशान्तोद्वेगाऽऽस्तिमितनयने यस्मिन्कर्मणि तद्गजाजिनदर्शनभयानिश्चलनेत्रं यथास्यात्तथा भवान्या शिवया दृष्टम्भक्तियस्य स लक्षितानुरागः ॥ ३६ ॥

हे मेघ तत्रोज्जयिन्यां योषितां स्त्रीणामुर्वीम्मार्गं दर्शयात लोक्यकया सौदामन्या विद्युता कथंभूतया सौदामन्या कनकस्य निकषःतस्येव स्निग्धं तेजो यस्याःसा तया सुवर्णोपलगतरेखा तेजसा कथं भूतानां योषितां नक्तं रात्रौ रमणस्य वसतिस्तां प्रियभवनं गच्छन्तीनां व्रजन्तीनां क्वसति तमोभि अन्धकारैः रुद्धे नराणां पतिस्तस्य पन्थाः तस्मिन् राजमार्गे रुद्धो अवलोकोपस्य तस्मिन् रुद्धालोके निरुद्धदृष्टि प्रसारे सति कथंभूतैस्तमोभिः सूचीभिभेद्यानि तैः रतिसान्द्रैः। किंच्च तोयस्योत्सर्गश्चस्तनितं च तास्यां मुखरा इति जलत्यागगर्जितशब्दायमाना मास्मभू मा भव कुवस्ता : स्त्रियो विक्लवा भीरवः ॥ ३७ ॥

भवान्मेघः पुनः भूयोऽपि अध्वनः शेषस्तमवशिष्टमार्गं वाहयेत्प्रापयेत क्वसति सूर्ये भानौ दृष्टे अवलोकिते सति। किं कृत्वा कस्या। क्वचिद् भवनस्य वलभिस्तस्यां भवन वलभौ गृहाच्छादनोपरिभागे तां रात्रिं नीत्वा - अपनीय कथं भूतायां भवनवलभौ सुप्ता पारावता यस्यां तस्यां शयितकपोतायां कथंभूतो भवान्क्चिरं विलसनं तस्मात्बहुकाल स्फुरणात् खिन्नं। विद्युदेव कलत्रं यस्य स श्रान्त तडिद्दाराः तथाहि सुहृदां मित्राणामभ्युपेतार्थस्य कृत्यायैस्ते अङ्गीकृत प्रयोजन क्रियान मन्दामन्ते मन्दा न भवन्ति खलु किल ॥ ३८ ॥

हे मेघ तस्मिन्काले सूर्योदयसमये प्रणयिभिः प्रियतमैः योषितां स्त्रीणां नयनयोः सलिलमिति नयनसलिलं
नेत्रजलं शान्तिं शमनं नेयं नेतव्यं। किंभूतानां योषितां खण्डितानामीर्ष्याकषायितानामतस्
तस्माद्धेतोर्भानोः सूर्यस्य वर्त्म मार्गमाशु शीघ्रं त्यज मुञ्च। कश्च स सूर्योऽपि न अल्पाऽनल्पा
ऽभ्यसूया यस्य सोऽधिकद्वेषी स्यात्भवेत् क्व सति त्वयि मेघे करान् रुणद्धि तस्मिन् संरोध
प्रंश्च विरोधके सति कथंभूतः स नलिन्याः पद्मिन्याः कमलमेव वदनं तस्मात् पङ्कजवक्त्रात् प्रालेय
मेवाऽस्रं तद् हिमाऽस्रं हर्तुं शमयितुं प्रत्यावृत्तः प्रत्यागतः ॥ ३९ ॥

हे मेघ ते तव छायेवात्मेति छायात्मा प्रतिबिम्बं शरीरमपि गम्भीरायाः रेवायाः सरितो नद्याः पयसि जले
प्रवेशं संक्रमणं लप्स्यते प्राप्स्यति कस्मिन्निव चेतसि। चेत इव कथंभूते पयसि चेतसि च प्रसन्ने
ऽतिनिर्मलेऽन्यत्रानुरक्तत्वाद्दोषरहितत्वे सति कथंभूत छायात्मा प्रकृत्या सुभग इति स्वभाव-
सुन्दरस्तस्माद्धेतोरस्या गम्भीरायाश्चटुलानि चतानि शफराणामुदवर्त्तनान्येव प्रेक्षितानीति
शीघ्रभीनो लुण्ठनावलोकनानि धैर्याद्गाम्भीर्यात् मोघीकर्तुं विफली कर्तुं त्वं नार्हसि-
नायोग्योसि कथंभूतानि चटुल शफरोद्वर्तनप्रेक्षितानि कुमुद्वद्विशदानि कुमुदविशदानि
कमलधवलानि ॥ ४० ॥

हे मेघ हे सखे लम्बित इति लम्बमानस्तस्य लम्बमानस्य पीतसलिल भरालम्बमानस्य ते तव
प्रस्थानं गमनं कथमपि यथाकथं भावि भविष्यति किं कृत्वा तस्या गम्भीराया: सलिलमेव 22
वसनं जलवस्त्रं नीत्वा अपनीय कथं भूतं सलिलवसनं नीलं श्यामवर्णं पुन: कथं भूतं सलिल
वसनं प्राप्तावानीरस्य शाखा येन तत् लब्धवेतसतलं मत एव किञ्चिद् दीपत करधृतं हस्ता
वलम्बिमिव स्थितम् पुन: कथं भूतं सलिलवसनं मुक्तो रोध एव नितम्बो येन तत् त्यक्त
तटकोटि तथाहि ज्ञातो स्वादो येन येन स भग्न नुभूतरसो । विवृतं जघनं यस्या सा तां विवृत
जघनां प्रकटीकृतकटिपूर्व भागां विहातुं त्यक्तुं क: पुरुष: समर्थ: शक्तो न कोऽपि
इत्यर्थ ॥ ४१ ॥

हे मेघ शीत: शीतलो वायु: पवनस्ते तव नीचै: शनैः वास्यति वाता कथं भूतो वायु: तव
निष्यन्दम्स्त्वन्निष्यन्दस्तेनोच्छ्वसिता या वसुधा तस्या गन्धस्तस्य सम्पर्कस्तेन रम्य:
त्वदुच्छ्वसितभूमिसुरभिसंसर्गरमणीय: पुन: कथं भूतो वायु: स्रोतसाम् रन्ध्राणि
तेषु यद् ध्वनितं तेन सुभगं नासाग्रकुहर शब्द सुन्दरं यथास्यात्तथा दन्तिभिर्गजै:
पीयमान: आघ्रायमाण: पुन: कथं भूतो वायु: काननेषु उदुम्बरास्तेषां वनजन्तु
फलानां परिणमयिता परिपाकयिता कथं भूतस्य ते देव पूर्वं देव शब्दपूर्वं गिरि
मित्यर्थ:
पर्वतं देवगिरिमुपगन्तुमिच्छतीति उपजिगमिषतो त्वुपजिगमिषुस्तस्योपजिगमिषो
रुपगन्तुमिच्छतो: ॥ ४२ ॥

(23) भवान् मेघः स्कन्दं कार्तिकेयं स्नपयतु अभिषिञ्चतु कैः पुष्पाणामासारास्तैः कुसुमसंपातैः कथंभूतो भवान् पुष्पाणां मेघ इति पुष्पमेघो ऽपुष्पमेघो कृत आत्मा येन स कुसुमाश्रीकृतशरीरः। कथंभूतं स्कन्दं तत्र देवगिरौ नियता वसतिर्यस्य स तं नित्य संनिहितं कथंभूतैः पुष्पासारैः व्योमगंगा तस्या जलानि तैरार्द्रास्तैराकाशानुसारैस्तथ स्मान्द्रः हि यस्माद्धेतोस्त स्कन्दरूप तेज नवशशि बिभर्तीति नवशशिभृत् तेन। शिवेन हुतमश्नातीति हुतवहस्तस्य मुखं तस्मिन्नग्निमुखे संभृतं स्थापितं किमर्थं वासवस्येमा वासव्यस्तासामैन्द्रीणां चमूनां सेनानां रक्षाया हेतुस्तस्य पालनार्थं कथंभूतं तेज आदित्यमतिक्रान्तमित्यत्यादित्यमतिक्रान्तसूर्यम् ॥४३॥

वाहिसं

हे मेघ पश्चात् स्कन्दाभिषेचनान्तरं पावकस्यापत्यं पावकिस्तस्य स्कन्दस्य तं मयूरं गर्जितैः स्तनितैः नर्तयेथा नृत्यं कारय कथंभूतं मयूरं हरस्य शशिशेखरस्य स्रक् तया आव चन्द्रकान्त्या धौता अपाङ्गौ यस्य स तं धवलकटाक्षं यस्य मयूरस्य भवानी गौरी बर्हं पिच्छं कर्णे श्रोत्रे करोति विदधाति केन पुत्रस्य प्रेम तेन पुत्रस्नेहेन कथंभूतं बर्हं ज्योतिषां लेखास्तासां वलयं यस्यास्तीति तत् तेजोरेखामण्डलिनः कथंभूतं बर्हं गलितं पतितं कथंभूते कर्णे कुवलयस्य दलं तत् प्राप्नोतीति तस्मिन् कमलपत्रभाजे ॥ ४४

औदेग्रहणं तेन गुरुस्तेनः ॥ देवगिर्यादि न महाद्रिः ॥

हे मेघ व्यालम्बेथाः अवलम्ब्यावतेर: त्वमिति शेषः किं कृत्वा एनं देवमाराध्य उपास्य कथंभूतमेनं शराणांवनं
शरवणं तत्र भवो यस्य स तं बाणतृणाऽरण्यजं कथंभूतस्त्वमुल्लङ्घितोऽध्वा येन सोऽतिक्रान्तमार्गः पुनः कथं (28)
भूतस्त्वं सिद्धानां द्वन्द्वानि तैर्देवयुग्मैर्जलस्य कणास्तेभ्यो भयं तस्मात्सलिललवभीते मुक्तो मार्गो यस्य स
त्यक्तवर्त्मा कथंभूतैः सिद्धद्वन्द्वैर्वीणाभिः तन्त्रीवाद्यैः किं करिष्यन् रतिदेवस्य दशपुरपतेः कीर्तिञ्चर्म
ण्वत्याख्यां मानयिष्यन् पूजयिष्यन् कथंभूतां कीर्तिं सुरभेस्तनयास्तेषामालम्भस्तेन जाता तां गवालम्भ
जन्योत्पन्नाम् यद्वा सुरभितश्चासौ नयस्तस्यालम्भः तेन जाता तां सुमतिग्रहणोत्पन्नां पुनः कथंभूतां
कीर्तिं भुवि लोके स्रोतसां मूर्तिस्तया प्रवाहरूपेण परिणतां विशेषरूपापन्नाम् ॥ ४५ ॥

(२५)

(२६)

28)

॥ पूर्वमेघदूतकाव्यम् ॥

॥ पूर्वमेघदूतकाव्यम् ॥

(२९)

॥ पूर्वमेघदूतकाव्यम् ॥

पूर्वमेघदूतकाव्यम्

॥ पूर्वमेघदूतकाव्यम ॥

(33)

॥ पूर्वमेघदूतकाव्यम् ॥

॥ श्रीः रघुवंशकाव्यम् ॥

अथ प्रजानाम् अधिपः प्रभाते जायाप्रतिग्राहितगन्धमाल्याम् ।
वनाय पीतप्रतिबद्धवत्सां यशोधनो धेनुमृषेर्मुमोच ॥१॥

अथ = निशातिक्रमणानन्तरम् ॥ प्रजानाम् = लोकानाम् ॥ अधिपः = ईश्वरः ॥ प्रभाते = प्रातःकाले ॥ ऋषेः = वसिष्ठस्य ॥ धेनुम् = नन्दिनीम् ॥ वनाय = वनं गन्तुम् ॥ मुमोच = मुक्तवान् ॥ कथंभूतोऽधिपः = यशोधनः यश एव धनं यस्य स यशोधनः = कीर्तिवित्तः ॥ कथम्भूतां धेनुम् = जायाप्रतिग्राहितगन्धमाल्याम् गन्धश्च माल्यञ्च गन्धमाल्ये जाया प्रतिग्राहिते गन्धमाल्ये यया सा ताम् जायाप्रतिग्राहितगन्धमाल्याम् = सुदक्षिणा स्वीकारितस्रक्चन्दनाम् ॥ पुनः कथम्भूतां धेनुम् = पीत

(२) प्रतिबद्धवत्सां पूर्वं पीतः पश्चात् प्रतिबद्धो वत्सो यस्यास्ताम् तथोक्ताम् = पीतानियन्त्रितबालतनयाम् ॥१॥
मनुष्येश्वरधर्मपत्नी धर्मस्य पत्नी धर्मपत्नी मनुष्याणामीश्वरः मनुष्येश्वरस्तस्य धर्मपत्नी = दिलीपधर्मभार्या ॥ तस्याः = नन्दिन्याः ॥ मार्गम् = पन्थानम् ॥ अन्वगच्छत = पश्चाज्जगाम ॥ कथम्भूतामनुष्येश्वरधर्मपत्नी = अपांसुलानाम् = न पांसुला अपांसुलास्तासां तथोक्तानाम् = पतिव्रतानाम् ॥ धुरि = अग्रे ॥ कीर्तनीया = परिगणनीया ॥ कथम्भूतम् मार्गम् = खुरन्यासपवित्रपांसुम् = खुराणां न्यासप्रकाशानां न्यासास्तैः पवित्राः पांसवो यस्य तं तथोक्तम् ॥ काकस्याः कामिव स्मृतिः = मन्वादिप्रणीत

वाक्यम् ॥ श्रुतेः = वेदस्य ॥ अर्थम् = अभिप्रायमिव ॥ २ ॥

निवर्त्येति, राजा = नृपः ॥ सौरभेयीं = नन्दनीम् ॥ जुगोप = ररक्ष ॥ कथम्भूतो राजा — दयालुः = कृपालुः ॥ पुनः कथम्भूतो राजा — यशोभिः = कीर्तिभिः ॥ सुरभिः = मनोज्ञः ॥ किं कृत्वा — तां दयितां = सुदक्षिणां ॥ निवर्त्य = परावर्त्य ॥ कथं भूतां सौरभेयीं — पयोधरी भूत चतुः समुद्राम् — पयसा अधरी भूता चत्वारः समुद्रा यया सा तां तथोक्ताम् = दुग्धतिरस्कृत चतुस्सागराम् ॥ कामिव - उर्वीमिव = पृथ्वीमिव ॥ कथम्भूतामुर्वीम् — गोरूपधराम् = धेनुरूपधारिणीम् ॥ पुनः कथम्भूतामुर्वीम् — पयोधरी भूत चतुः समुद्राम् = धरन्तीति धराः पयसां धरा इति पयोधराः, अपयोधराः पयोधरी भूता शमपद्यमाना चत्वारः समुद्रा यस्यास्तां तथोक्ताम् = स्तनीभूत चतुस्सागराम् ॥ ३ ॥

व्रतायेति, तेन = दिलीपेन ॥ व्रताय = व्रतं कर्तुम् ॥ अनुयायिवर्गः, अनुयायिनां वर्गः = सेवकसमूहः ॥ न्यषेधि = परावर्त्यत ॥ कथम्भूतेन तेन — धेनोः = नन्दिन्याः ॥ अनुचरेण = सेवकेन ॥ कथम्भूतो ऽनुयायिवर्गः — शेषोऽपि = अवशिष्टोऽपि ॥ सुदक्षिणा पक्षयो प्राप्तत्वम् ॥ कुतस्तद्धात्मरक्षणमत आह ॥ तस्य = दिलीपस्य ॥ शरीररक्षा = देहत्राणम् ॥ अन्यतः = पुरुषान्तरात् ॥ हि = यतः ॥ मनोः = मनुवंशस्य ॥ प्रसूतेः = सन्ततिः ॥ स्वीस्ववीर्य गुप्ता स्ववीर्येण रक्षिता = आत्मा पराक्रमरक्षिताः ॥ ४ ॥

आस्वादवद्भिरिति, स = दिल्लीपस्य ॥ तस्याः = नन्दिन्याः ॥ समाराधनतत्परः = शुश्रूषासक्तः ॥ अभूत = अभवत ॥ कथम्भूतः स सम्राट = चक्रवर्ती ॥ कैः = त्रणानाम = घासानाम ॥ कवलैः = ग्रासैः = पूर्णैः कथम्भूतैः कवलैः — आस्वादवद्भिः = स्वादिष्टयुक्तैः ॥ पुनः कथम्भूतैः कैः — कण्डूयनैः = खर्जनैः ॥ पुनः कैः — दंशनिवारणैः = बनमक्षिकादूरकरणैः ॥ पुनः कैः — स्वैरगतैः = स्वच्छन्दगमनैः ॥ पुनः कैः — अव्याहतैः = अप्रतिहतैः = ५॥ ॥५॥

स्थित इति, भूपतिः = दिल्लीपः ॥ ताम = नन्दिनीम ॥ अन्वगच्छत = पश्चाज्जगाम ॥ कथम्भूतो भूपतिः — स्थिताम = स्थितवतीं दृष्ट्वा ॥ स्थितः = स्थितवान्सन ॥ पुनः कथम्भूतो भूपतिः — प्रयाताम = प्रस्थितां दृष्ट्वा ॥ उच्चलितः = प्रस्थितः सन ॥ पुनः कथम्भूतो भूपतिः — निषेदुषीम = निषण्णां दृष्ट्वा ॥ आसनबन्धधीरः = उपवेशनसमर्थः ॥ पुनः कथम्भूतो भूपतिः — जलम = नीरम ॥ आददानाम = पिबन्तीं दृष्ट्वा ॥ जलाभिलाषी जलस्याभिलाषी जलाभिलाषी = वारिच्छुः सन ॥ कैव = छायेव = प्रतिमिम्बमिव ॥ ६॥

(३७) सन्यन्तीति, सः = राजा॥ द्विपेन्द्र इव = करीन्द्र इव॥ प्राभात = प्रभवत॥ कथम्भूतो द्विपेन्द्रः – प्रनावि ष्कृतादानराजिर्येन स तथोक्तः = वहिर प्रकटितमदरेखः॥ पुनः कथम्भूतः – प्रन्तर्मदावस्थः प्रन्तरगता मदावस्था यस्य स तथोक्तः = मध्यस्थानस्थः॥ किङ्कुर्वाणः – राजलक्ष्मीं = राजश्रीभाम॥ दधानः = बिविभ्राणः॥ कथम्भूताम राजलक्ष्मीम – न्यस्तचिन्हाम – न्यस्तानि चिन्हानि यस्यास्तां तथोक्ताम = परिहत छत्र-चामरादिकाम॥ पुनः कथम्भूतां राजलक्ष्मीम = तेजोविशेषानुमिताम् = तेजो विशेषणानुमिता तां तथोक्ताम = प्रभावेति शोभाहिताम ॥ ७ ॥

लताप्रतानोद्ग्रथितैरिति, सः = दिलीपः॥ दावम् = वनम॥ विचचार = बभ्राम॥ किं कुर्वन्निव – मुनिहोमधेनोः = मुनेर्वशिष्ठस्य होमधेनोरग्निहोत्रसाधनेः भूतनन्दिन्याः॥ रक्षापदेशात = रक्षणव्याजात॥ दुष्टसत्वान = हिंसकजन्तून॥ विनेष्यन्निव = शिक्षयिष्यन्निव॥ कथंभूतान दुष्टसत्वान बन्यान = बने भवास्तां तथोक्ताम॥ कथम्भूतः सः केशैः = लोम्नै रुपलक्षितः॥ कथम्भूतैः केशैः – लताप्रतानोद्ग्रथितैः॥ लतानां वल्लीनां प्रतानैः कुटिलतन्तुभिः रुद्ग्रथितास्तैस्तथोक्तैः॥ कथम्भूतः सः अधिज्यधन्वा = आरोपितज्याको दण्डः ॥ ८ ॥

विसृष्टेति, तस्य = दिलीपस्य ॥ पार्श्वद्रुमाः = निकटवर्तिनो वृक्षाः ॥ आलोकशब्दम् = जय 38
शब्दम् ॥ उदीरयामासुरिव = कथयामासुरिव ॥ कैः - वयसाम् = खगानाम् ॥ विरावैः = शब्दैः ॥
कथम्भूतानां वयसाम् उन्मदानाम् = उत्कट मदानाम् ॥ कथम्भूतस्य तस्य विसृष्टपार्श्वानुचरस्य =
विसृष्टास्त्यक्ताः पार्श्वेऽनुचरा येन तस्य तथोक्तस्य ॥ पुनः कथम्भूतस्य तस्य पाशभृता
पाशं बिभर्तीति पाशभृच्च नतथोक्तेन ॥ समस्य = तुल्यस्य ॥ ९ ॥
मरुदिति, बालल्लताः = नूतनवल्लयः ॥ प्रसूनैः = पुष्पैः ॥ तम् = दिलीपम् ॥ अवाकिरन् =
ववृषु ॥ कौकिव - पौरकन्या = नगरबालिकाः ॥ आचार लाजैरिव = अक्षतैरिव ॥
कथम्भूता बालल्लताः - मरुत्प्रयुक्ताः = वायुप्रेरिताः ॥ कथम्भूतं तम् - मरुत्सखाभम् =
मरुतः सखा मरुत्सखाग्निः इवाभातीति मरुत्सखाभस्तं तथोक्तम् ॥ पुनः कथम्भूतं तम् अच्युतम् =
पूज्यम् ॥ पुनः कथम्भूतं तम् - आरात् = समीपे ॥ अभिवर्तमानम् = विद्यमानम् = १० ॥
धनुर्भृतविति,

(३४) धनुर्भृतश्चेति, हरिण्यः = मृग्यः ॥ अक्ष्णाम् = नेत्राणाम् ॥ प्रकामविस्तार फलम् = अत्यन्त
दैर्घ्य फलम् ॥ आपुः = लेभिरे ॥ अस्य = दिलीपस्य ॥ वपुः = शरीरम् ॥ विलोकय
न्त्यः = आलोकयन्त्यः ॥ कथम्भूतस्यास्य — धनुर्भृतः = कोदण्डधारिणः ॥ कथम्भूतं वपुः =
अन्तःकरणैः = चेतोभिः ॥ दयाद्रभावम् = कृपाकोमलाभिप्रायम् ॥ आख्यातम् = वर्णित
म् ॥ कथम्भूतैरन्तःकरणैः — विशङ्कैः ॥ विगताशङ्का येभ्यस्तैस्तथोक्तैः = निर्भिकैः ॥ ११ ॥

(४२) संचारपूतानीति पतङ्गस्य = सूर्यस्य ॥ प्रभा कान्तिः मुनेः वसिष्ठस्य धेनुश्च नन्दिनी-
च दिनान्ते सायंकाले ॥ निलयाय स्तमयाय धेनुपक्षे आलयाय च गन्तुम् यातुम्
प्रचक्रमे उपक्रान्तवती किंकृत्वा दिगन्तराणि दिशावकाशानि कथम्भूतानि दिगन्तरा
णि संचारपूतानि परिभ्रमणशुद्धानि कृत्वा विधाय कथम्भूता प्रभा पल्लवरागताम्रा
अभिनवच्छदवर्णा ताम्रवर्णा ॥ कथम्भूता धेनुः - पल्लवरागताम्रा ॥ १५

मध्यमलोकपालः = भूपालः ॥ ताम् = गाम् ॥ अन्वगच्छत् = पश्चाज्जगाम ॥

तेन दिलीपेन ॥ सा नन्दिन्या ॥ बभौ शुशुभे कथम्भूतेनेतेन सतां सज्जनानाम्
मतेन मान्येन ॥ कथम्भूतां ताम् - देवता पितृ अतिथि क्रियार्थाम् इन्द्रादिपालकाभ्यागत-
यागश्राद्धदानप्रयोजनाम् ॥ केव दृष्टिमेव श्रद्धेव साक्षात् प्रत्यक्ष विधि अनुष्ठा-
नेन ॥ उपपन्ना युक्ता ॥ १६ ॥

सः राजा वनानि अरण्यानि पश्यन् अवलोकयन् ययौ जगाम कथम्भूतानि-
वनानि - पल्वलोत्तीर्णवराहयूथानि = अल्पजलाशयनिर्गत शूकरकुलानि ॥

सः = राजा ॥ वनानि = अरण्यानि ॥ पश्यन् = अवलोकयन् ॥ ययौ = जगाम ॥ कथम्भूता-
नि वनानि - पल्वलोत्तीर्णवराहयूथानि = पल्वल जलाशयान् निर्गत शूकर कुलानि ॥
पुनः कथम्भूतानि वनानि - आवासवृक्षोन्मुखबर्हिणानि = निवास पादप सन्मुख मयूराणि ॥
पुनः कथम्भूतानि वनानि - मृगाध्यासित शाद्वलानि = हरिणाधिष्ठित शष्पप्रदेशानि ॥
पुनः कथम्भूतानि वनानि - श्यामायमानानि = नील वर्णानि ॥ १७ ॥

वनिता = सुदक्षिणा ॥ तम = दिलीपम ॥ पपा = पीतवती ॥ काभ्यामिव = शोषिताभ्याम = बभुक्षिताभ्याम ॥ लोचनाभ्याम = नेत्राणाम ॥ कथम्भूता वनिता - निमेषालसपक्ष्मपंक्तिः ॥ = निमेषेषु नेत्रनिमीलनेषु ॥ अलसा मन्दा पक्ष्मणां नेत्राणाम पंक्तिः राजिर्यस्याः सा तथोक्ता ॥ कथम्भूतं तम - वसिष्ठधेनोः = मुनिनन्दिन्याः ॥ अनुयायिनम = अनुचरम ॥ पुनः कथम्भूतं तम - वनान्तात = अरण्यमध्यात ॥ प्रवर्तमानम = प्रत्यागतम ॥ १९ ॥

सा = असौ ॥ धेनुः = नन्दिनी ॥ तदन्तरे = तयोरभ्यन्तरे मध्ये ॥ विरराज = शुशुभे ॥ कथम्भूता सा - वर्त्मनि = मार्गे ॥ पार्थिवेन = दिलीपेन ॥ पुरस्कृता = अग्रतः कृता ॥ पुनः कथम्भूता सा पार्थिवधर्मपत्न्या = सुदक्षिणया ॥ प्रत्युद्गता = अग्रस्थापिता ॥ केव = संध्येव = सायंकालेव ॥ कथम्भूता सन्ध्या - दिनक्षपा = मध्यगता = दिवसरात्रिमध्यप्राप्ता २० ॥

सुदक्षिणा = दिलीपभार्या ॥ ताम = धेनुम ॥ आनर्च = पूजयामास ॥ कथम्भूता सुदक्षिणया - साक्षतपात्रहस्ता = सतण्डुलभाण्डकरा ॥ कथम्भूतां ताम - पयस्विनीम = प्रशस्तक्षीराम ॥ किं कृत्वा - प्रदक्षिणीकृत्य = परिक्रम्य ॥ पुनः किं कृत्वा - प्रणम्य = नमस्कृत्य च = २१ ॥

"रघुवंशकाव्यमसर्गद्वयम"

सा = धेनुः ॥ सपर्यां = पूजाम ॥ प्रत्यगृहीत = स्वीचकार ॥ इति = हेतोः ॥ तौ = दम्पत्यौ ॥
ननन्दतुः = अहृषतुः ॥ कथम्भूता सा - वत्सोत्सुकापि = पुत्रोत्कण्ठापि ॥ पुनः कथम्भूता सा -
स्तिमिता = निश्चलनेत्रा ॥ हि = यतः ॥ भक्त्या = श्रद्धया ॥ उपपन्नेषु = युक्तेषु ॥ तद्वि-
धानाम = नन्दिनीसदृशानाम ॥ प्रसादचिन्हानि = प्रसन्नतालक्षणानि ॥ पुरःफलानि =
पुरागतानि ॥ भवन्ति ॥ 22 ॥

दिलीपः = नृपः ॥ दोहावसाने = दोहनानन्तरं ॥ दोग्ध्रीमिव = दोहनशीलामिव ॥
पुनः = भूपः ॥ भेजे = सेवितवान ॥ कथम्भूतः दिलीपः = भुजोच्छिन्नरिपु = करना
शितशत्रु ॥ कथम्भूतां दोग्ध्रीं - निषण्णाम = उपविष्टाम ॥ किं कृत्वा गुरोः = वसि-
ष्ठस्य ॥ पादौ = चरणौ ॥ निपीड्य = प्रणम्य ॥ कथम्भूतस्य गुरोः - सदारस्य = सपत्नी-
कस्य ॥ पुनः किं कृत्वा विधिं = अनुष्ठानम ॥ समाप्य = विधाय ॥ कथम्भूतं वि-
धिं - सान्ध्यं = सायन्तनम ॥ 23 ॥

गोप्ता = रक्षकः ॥ क्रमेण = क्रमशः ॥ सुप्ताम = निद्रिताम ॥ अनु = पश्चात ॥ संविवेश = सुष्वाप ॥ प्रातः = प्रभात ॥ सुप्तोत्थितां = निद्रापविष्ठाम ॥ अनु = अनन्तरं ॥ उदतिष्ठत = उत्थितोऽभवत ॥

श्री:

दोहा

सतगुरु शक्ती ब्रह्म शिव विष्णु सिंह जु [illegible] सुर शेष
दिगपाल में मंगल करें सुखदायक प्रथम गणेश

सिंहाऽवलोक

त्र्यम्बक के तनय शुभ रूपी सदा मंगल करन

करन मंगल मूल हो आनंद दाता दुख हरन

दुखहरन उस्ताद सेढू सिंह कारी रखये परन

परन से औ राम रखते हैं सदा तुमरे चरन

भेट कथासंबन्धी

दोहा. गणपति शक्ति सरस्वती – गुरुपद पद्म मनाय
राम प्रीत हित चितसोहित – लंक दहन कहुं गाय

यथा शक्ति भीतर घुस कर जो से सब वांछित फल को पाते हैं
तिस पर भी लौकिक के गीत प्रीत की रीत नित दिखलाते हैं
चौरासी सिद्ध जती सती आदि कवियों को सीस नवाते हैं
गुरु सेठी सिंह रक्षक खुशदिल श्री राम नाम गुण गाते हैं

अथ लंका दहन लिख्यते

दोहा. जनक सुता के प्रेम की – दशा को सुन हनुमंत
फूला अंग न समावता – महाबीर बलवंत

झूलना ॥ महावीर बलवंत प्रेम में फूले नहीं समाते थे
और जग जननी को निरख २ मन अति आनंद मनाते थे
दूर हुई सब भ्रांति शंसेत से पवन पुत्र मुसक्याने लगे
सिया प्रीति की भक्ति से खुशी दिल को लख बल के शरारे आने लगे

दोहा- जनक सुता का प्रेम लख - अति प्रीत मन हरषाय
पवन कुँवर कहे फेर यूँ - हाथ जोड़ सर नाय

झूलना - अम्मा जी अब यह अर्ज मेरी मुझे क्षुधा क्षुधा बहुत बड़ी भारी है
फल देख २ इन वृक्षों के रसना लगी बहन हमारी है
और इनको कुछ दहशत न मुझे जो कुछ भी हैं यहां रखवाले
जब आपका हाथ सिर तो बात है क्या खुशी दिल को कौन है यह साले

49

दोहा - लख हनुमत की धृष्टता को - कहे जानकी मात
लो ले नाम रघुनाथ का - खाओ मधुर फल तात

क़व्वाली - चले जावो खाओ फल बेशक पवनसुत देर मत लावो
यही वरदान है मेरे - सफल हों काम सब तेरे - सफल हों
फल वे सब इस वन जिन्हें तुम तोड़ के खावो ॥ चले ॥ १ ॥
अरे मेरे शेर बजरंगी - दुआ दूं तुझ को फिर चंगी - न हो तेरा
बाल भी बांका हरी के ध्यान से जावो । चले ॥ २ ॥
यही तो बयत से मीठा नी - तेरी कुछ तो हो महमानी - उदर

कुन हो जब मूर्छे लछमन फिर लौट के आवो ।। चले ।।३।।

गगन जल का बने सवेर – तेरे लिये मोम हो पत्थर – रिपु क्षय

हो तेरी जय हो कहें खुशदिल फ़तह पावो ।। चले ।।४।।

दो. पाय हुकम जो मात का – धार हृदय में ध्यान

खुशदिल से श्रीराम रट – चले बीर हनुमान

भू. – दी दृष्टि डाल जिस डाल पै बस उस डाल पै फिर रहे डाल नहीं

दिये तोड़ फेंक फल फूल सभी रहा सूखे सब्ज़ रंग लाल नहीं।

शहज़ोर घोर कर शोर दरख़्तों को हिलाये हुए खुश भारी

चुन रहे थे अंजनी के शेर फल खाने लगे दे किलकारी।

51

मीठे २ फल खाय पेड़ जड़ सहित सिन्धु में डाले थे

रखवाले रिज़ाले जो साले उन्हें डन्डे के साथ निकाले थे

दोहा — जब हुए पहरेदार सब — बहुत ही ज़्यादे तंग

रावण के इजलास में — जा बोले इक संग

मू० — उस रुप शोक किया बड़ा शोक हुआ राजन इक बंदर आय रहा

~~पाल~~

फल खाये नोचे के फूल मूल से वृक्ष उखाड़ गिराय रहा

आफ़त का के ले तीर ज्याफ़त बंदर क्या जाने क्या मस्त है

दियो बाग़ उजाड़ हमें मारा रुन शादिल को बड़ी नदामत है

दो० — सुन रखवालों के वचन — हुक्म करे दशशीस

मेघनाद हो जादु भट — देखो कौन है कीस

बहुत सेन शचहदावते — देखके पवन कुमार

गर्जो वृक्ष उठाय कर — मार मही खिलकार

पुनः प्रचार शब्द कांपे भिप्तार — गुन गोपुर खोता पुर चटे पटेद

चेहरे हुते फल्के गये सूल हतवे खोटों न पताका जनश्या बेदे

कुछ मार पटक कुछ मंके फटल — न टलटने यूं मार चटलायादवे

कुछ पेले समुद्र बन्द में — कुछ बांधकर खाट आप दीये

[illegible] ने जब मति [illegible] ने जब [illegible] ऊंदे [illegible]

[illegible] सेना पति जब [illegible] पे [illegible] [illegible]

[illegible]: [illegible] [illegible] [illegible]

[illegible] [illegible] जंगी सेन [illegible]
[illegible] [illegible] लिया [illegible]

[illegible] [illegible] पां [illegible]

[illegible]:
[illegible] [illegible] [illegible] जीत

[illegible] [illegible] [illegible] [illegible] ज्योति

माली ने कैसा वृक्ष उखाड़ जो गिरे = पुष्प पत्तों ने मुंह को फेर लीया

पाते देख्ये से सूद पल झड़ गये वा नीचे गिर लिया " "

माली पात से गात जो आंगन में = दम पुष्प कुम्हला के झुकने लगा

दीनता दीन हुआ कांति हीन = तन चमन का जोबन लुटने लगा

तब कैसा धूल के नीचे पड़ा = मन हूं के तन डमाडोल हो

जब प्राण वायु उसके तन से = बड़ी चपल चोल से जाय हो

पुष्पों के नैन कपीते से = ज्योति सूद पड़ उनके दिलों में

तब रौले वह गुम होने लगे = फूल जाय बेताबी जो जन में

क्यों ने दस्तख़त रक़म किये में हीं = लिखने ही पापों को खोते गये

दुनिया दिल में ले गये जान को ज़ुद्द = एक आलम निकल जाते गये

बेवतनो = पड़े पत्ता गुज़ान हुए यहां = हरी क्या बादशाही है

उजाड़ी बाग़ बाड़ी सब = लूटपीट क्यों में ग़म्पन

ग़ज़ब से राजा राजन को = प्राणु भी न गुज़ाई है

पापे तोड़ गो ब्याड़ = फ़ंजोड़ गुरुद्वारों को

फ़ख़्र इसके ही बन्दा = तो हम सब की तबाही है

लिया न खोद नागी या = सुनाफी यादे ए ए जान

मेरे ग्रुध्दु हुंवा जेनं ग्रनेन = प्राप्त हामिसली ग्राई है

सज़ा हो जब मज़ा हो जब = कज़ा हो जब रज़ा हो जब

केहं खुपादिल नहीं तो तुमने = मात खोई है

दो: + तीन दिसा पत सुन चुका ∴ जिस दसा निस्चय ताद

मनो प्रश्न कुमार सा ∴ सुतल खेंची ग्राद

मेरी ज्ञान मेरे प्राण तू ∴ मेरे नाथ जो बेग

उस बन्द बदमाशो ∴ बांधा ला लाके है नेग

कमनपिता का मानकर ः मेघनाद बलवान

टोलपारकर के संग में ः लचलादित्य वीर महान

पवन पुत्र हंसे द्वारा ले ः देखे के दल मज़बूत

समझ लिया प्रावे चला ः महा अहत का अट

फूटना: फ़ौलाद ही गर्जे देत्य वेंच ः हल पड़ न्यू उस पे वार किया

मेस फाड़े लोचवान वाले ः फ़ौजें का भी बेड़ा पार किया

तपाकर के जो ये सेनापति ः उनसब को मनपर डोलादिये

घननाद के रूप जाय ॥ बली बजरंग नौमि बलतीता दिये

तीनें पें जमाल ते कुरूर = फट उधल वक्षप जा बैठ

बालि इन्दु जीत से वी लोभी ॥ गया प्रागया जती हत बैठ

प्राया हाथ ता माया पी = उस पुत्र न लि लेन पानं ची

माया पति के दूत पवन पूत ॥ ला नद कुद पीन ची

पर्पनाथ कहता है

दो: प्राणवीर परि लि = कुप्पा हाल बहाल

वेड़ा हा दुश्मन सागन ॥ हाथां होम ल्यारा

फूलना = बादल जैसी धूम गाजे परी = मुझे पवन नाई ज्यूं लहरे है

मैं न इन्दु सा जो बीतसिन = जो लको के सुन्दर रहते हैं

मां जान लेंगे ज्यूं जान लेतू = यह सदा ही बल पाते हैं मुझे

नहीं मां पिता के कुल में बिन = पुन बांध के चलता हूं तुमे

जवाब हनूमान

दो: बलता है क्यों दुष्ट तू ; वैसे ही सारा प्यार

लेना लंक छदपन ; तो पिता हाथ से हाथ

फूलानाः जो तुफ लेप्राव प्रुइ यसीं तेले ॰ तो पुप्फोद ल्योपी गेप्रातू

ताहलुन्यां तेल्य खेड़ पूहल्यो हल्य ॥ प्रव्वल दाजेम्बेहातू

मरी ठोल्य ल्या तुल्यमी मी नहीं ॥ मिसल्यी ल्ही नाहवनाता हू

श्रीएल्य ल्या दाल हुं वोलेलंतु ॥ लेल चाल वातनाद ल्हाता हू

तैगीसिल्हुइन्दे ल्यो नसेलंलिया ॥ पंल्याव ल्यानपा ल्य नैठ हूं

मरापाना ज़न तेलव लुनपाल्हा ॥ श्रीएल्य ल्या नसल्य लैठहू

तड़ल्य श्रीम्राइ गयापड लव्ताप्रुन ॥ लूल पद्माप्राजन्डु ॥

तल्य ल्य ब्रह्मालवल्यो वल्यनेल्या न्यूसन्डु ॥

बस है पलड़े मैं जाऊंगा तुम्हें ‐ आप तुच्छ पे हाथ में क्या उठता

सौ दो सौ की गिनती है क्या ‐ नहीं कुछ लश्कर तुम्हें दिखलाता

बेपरवाह दिवाना है बन्दा ‐ मैं मं झगड़े नहीं पालता हूं

ले जान लड़ाता कहा ब्रह्म फांस ‐ तुम पाहिला मैं बांधे डाला हूं

दो: बोले यूं महाबली फ़न ‐ युद्ध न कुछ उपाय

क्यूं लाचार इस पाश का ‐ ब्रह्म शस्त्र है नाम

श्री ब्रह्मां जी का प्यार पाश के बन्धन में यूं आ पड़ा

पुरुषे निरगुण निरंजन सी ऋषि राज ॥ इसको जो पंडित दवाय दे हो

जाणे सी हर दे इस प्राणि तले ॥ पुत्र ते भी पंडित सल्ल हूं

पर सृष्टि ने माने कर दे वह ॥ वुद्धा वा पी दिलयों सुलाह दूं

श्री पुरुषोत्तम प्रभूनाथ ॥ सदा माजी पीजित को प्यारे हैं

श्री राम नाम उनने से सदा ॥ सब वांछित फल को पाते हैं

पन हूल तू सुन तव वन सेवें ॥ उनको गोदान रूपाया है

स्वपते स्वामी ने मात प्राप्त ॥ इस त्रातने प्रानंद धुआया है

पद्मा लीं ए गम्मी ते वंश्वद् हुण पी ॥ बहु रासी विश्व सम्पट कर दिये

पी एप्याविलासुखे वंद पुरुषोत्तम ले ॥ बहुदल पन प्रांत रस पट दिये

कमाली= गरजे है वीर बजरंगी अकेला उस सेन दल में =

जती हनुमान जब गरजे - गरजे से दल के कलेजे लरजे - अजब अन्दाज़ हनुमत का है दिल सब के हल चल में -
बड़ा बलवान मतवाला - चले जैसे नाग हो काला - दहाड़ डाले गले माला मगन अमरों के जंगल में = २ =
न दिल पे जंग का खटका - न उनके संग का खटका - न रावण जंग का खटका चला जाय झूमता बल में = ३ ।
निशाचर मस्त जाते थे - न कुछ छल बल दिखाते थे = ये पढ़ श्री राम गाते थे जन खुशी दिल हो क्या पल में ४ =

दो= सभी के अन्दर जब गये महावीर हनुमान
देख के रावण कोप से बोला वचन महान =

तू अब तो अपना पता बता भला कहां को है ज़ालिम बंदर - फुलवाड़ी उजाड़ी अनाड़ी घुसा किस गरज़ से बाग चमन अन्दर
कभी मुझसे राजा रावण को क्या सुना नहीं तूने पगले
नहीं खौफ़ खतर लाया दिल पे किये ख्याल न कुछ पिछले अगले =
तूने मारा मेरा अक्षकुमार ले बोल सज़ा क्या करूं तुझे
खुश दिल हूं साफ़ समझ करके ये हे बतला इसदम वेग मुझे =

दो= ब्रह्म फांस से छूटकर पवन पुत्र बलवान = कहन लगा मेरी बात अब सुन रावण धर ध्यान =
जो अति अनूप अनुपम स्वरूप सत चिदानन्द स्वच्छन्द घना =
रघुकुल के चन्द अजन दे कनन्द श्री रामचन्द्र मति मन्द सुना =

जो सृष्टी को रच पालन करते प्रलय रूप से फिर संहार करें ।
ब्रह्मा बिष्णु महेश जिनके संकेत से जग विस्तार करें ॥
दशरथ नृप के जो राजकुंवर घनश्याम राम नहिं नाम सुना —
ओशक कहुं जिनने शूपनखा ने खरदूषण का नाश सुना ॥
कर याद याद शायद हो तुझे जिनकी स्त्री हर लाया तू ।
खादिम हूं मैं उस राम का सुन मेरा भेद अभी नहि पाया तू ॥
सिया जी की खोज में आया हूं क्या डर है लंके में आने का ।
लगी भूख जो सूख फल देख फल खाय ना मैं बहाने का ॥
बेढंगे हो तुम मेरी सुध भी न ली आखिर को तो महमान हूं मैं ।
हैवानों से फल तोड़ लिये बंदर हूं ना इन्सान हूं मैं ॥
अब ज़रा समझ देखा तू तो यह जानता प्यारा है सबका ।
मारा मुझे जिसने मैं भी उसे फिर ज़िन्दा रहने देता कबका ॥
दो। अर ज़रा अब ध्यान से सुनि नृप तन मन लाय ।
वक़्त जो आगया बिन करे तुझसे रहा न जाय ॥
क्यों जगदम्ब सिया को रावन जो आफ़त से दुख देते हो ।
फँसे काल चक्कर में तुम नाहक़ संसार में अपयश लेते हो ॥

65

क्रोधी जो होते हैं ज्यादे वो मुन्तको सब पढ़ते ते हैं।
होश्यार हो सुबगद लंकपती बल्के काल के पहर आते हैं॥
मेरी रायमें तो ऐसा आवे तजे बर सिया यहां पहुंचावो।
आपको प्यारी हे खैर आरामसे बैर मता लावो॥
रावण॥ दो = बन्दर बक २ मतकर चलता हुई फ़िसाद।
बनके गुरु कर रहा शुरु क्यों इतनी बकवाद॥
कहूं क्या मैं गरज आरसों को गरज रहे लज ये भटका मरा हि है।
मेर ताब चांद सूरज सुह मके ज़रा देख ये लटका मरा हि है॥
मेरी मस्त नज़र है जो होवे कभी तो चौदह भुवन चकराते हैं।
और काल के दमें इन्द्र बरुन मेरे यहां जल भरने आते हैं॥
तेरी चोसी का सुनके बन्दर अब हंसी न्यू आती है मुझको।
एक मामूली बच्चे की सिफ़्त कर रहा ये क्या सूझी तुझको॥
जो सपने आके क्या समझा नाहान वो सब फ़िक्र ध्यान में है।
आराम नाम रट आठों जाम खुशी दिल तू किस गुमान में है

हनुमान,, दो= सुनो बीर हनुमान तब रख्के नन नकर फेर।

ऐसो राकस पर प्यार करे न्यू सुजनो कोश॥

तू जो नादान कहता है उन्हे न्यू उनका वज़न घटता ही नहीं।

चाहे जितनी खाक फेंके कोई सूरज तो कभी छुपता ही नहीं॥

तेरी मौत जो आ पहुंची है निकट शठ जभी तो तू हठ पाय रहा।

चंडूल फ़ज़ूल मेरा कहना गीत काल सतू चकराय रहा॥

तू झूठी ममता माया को तज कुछ भी ना तेरा मेरा है।

न्यू है-पाया न्यू ही चला जावे कुल दिन का रैन बसेरा है॥

जो सुमरेगा श्रीराम नाम तो स्वर्ग में वास करेगा तू।

नहीं खुश कलाम कहते खुशी दिल कुत्ते की मौत मरेगा तू॥

गाना, मम पदी,, अरे रावन हुवा क्यों नादान॥

सुत कलत्र और मित्र कुटुम्बी को तू जे का थान = अरे रावन १

अंत समय कोई संग चले ना-जाय अकेला जान = अरे - २

गज रथ घोड़े कोष पड़े हैं-सुन लश्कर जवान = अरे = ३

भोग विलास निन्द काया में - बन रहा है मस्तान = अरे = ४

समझ तू-सब सुपन कतबको- को काम न दे सन्तान = अरे = ५

रामब्रह्म सियामाया शक्ति - रखना इसेप ध्यान = ६ ॥
खुशदिल चमन अमन में रहत - न्यू कहे बार हनुमान = ७ ॥

रावण, दो = लंकपती बलवीर का सहन शक्ति थी कब,
यह जवाब फ़ासल दिया गज़बनाक हो तब ॥

मेरे दरबार देखो कैसा कत्ल दराज़ यह बन्दर है ।
